श्रीमदीश्वरकृष्णप्रणीता

साङ्ख्यकारिका

दु:खत्रयाऽभिघाताज्जिज्ञासा तदभिघातके हेतौ।
दृष्टे साऽपार्था चेन्नैकान्ताऽत्यन्ततोऽभावात्।।१।।
दृष्टवदानुश्रविक: स ह्यविशुद्धिक्षयाऽतिशययुक्त:।
तद्विपरीत: श्रेयान् व्यक्ताऽव्यक्तज्ञविज्ञानात्।।२।।
मूलप्रकृतिरविकृतिर्महदाद्या: प्रकृतिविकृतय: सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृति: पुरुष:।।३।।
दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धि: प्रमाणाद्धि।।४।।
प्रतिविषयाऽध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम्।
तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनन्तु ।।५।।
सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात्।
तस्मादपि चाऽसिद्धं परोक्षमाप्ताऽऽगमात्सिद्धम्।।६।।
अतिदूरात्सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।
सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहाराच्च ।।७।।
सौक्ष्म्यात्तदनुपलब्धिर्नाऽभावात् कार्यतस्तदुपलब्धे:।
महदादि तच्च कार्यं प्रकृतिविरूपं सरूपं च।।८।।
असदकरणादुपादानग्रहणात् सर्वसम्भवाऽभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।।९।।
हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्।।१०।।
त्रिगुणमविवेकि विषय: सामान्यमचेतनं प्रसवधर्मि।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्।।११।।
प्रीत्यप्रीतिविषादात्मका: प्रकाशप्रवृत्तिनियमार्था:।
अन्योऽन्याभिभवाऽऽश्रयजननमिथुनवृत्तयश्च गुणा:।।१२।।
सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलञ्च रज:।
गुरु वरणकमेव तम: प्रदीपवच्चाऽर्थतो वृत्ति:।।१३।।
अविवेक्यादे: सिद्धिस्त्रैगुण्यात्तद्विपर्ययाऽभावात्।
कारणगुणाऽऽत्मकत्वात् कार्यस्याऽव्यक्तमपि सिद्धम्।।१४।।
भेदानां परिमाणात्समन्वयाच्छक्तित: प्रवृत्तेश्च।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ।।१५।।
कारणमस्त्यव्यक्तं प्रवर्त्तते त्रिगुणत: समुदयाच्च।
परिणामत: सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात्।।१६।।
सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात् कैवल्याऽर्थं प्रवृत्तेश्च।।१७।।
जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव।।१८।।
तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च।।१९।।
तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।
गुणकर्तृत्वे च तथा कर्त्तेव भवत्युदासीन:।।२०।।
पुरुषस्य दर्शनार्थं कैवल्याऽर्थं तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृत: सर्ग:।।२१।।
प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशक:।
तस्मादपि षोडशकात्पञ्चभ्य: पञ्च भूतानि।।२२।।
अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्।
सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम्।।२३।।
अभिमानोऽहङ्कारस्तस्माद् द्विविध: प्रवर्त्तते सर्ग:।
एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव।।२४।।
सात्त्विक एकादशक: प्रवर्त्तते वैकृतादहङ्कारात्।
भूतादेस्तन्मात्र: स तामसस्तैजसादुभयम्।।२५।।
बुद्धीन्द्रियाणि चक्षु:श्रोत्रघ्राणरसनत्वगाख्यानि।
वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहु:।।२६।।
उभयात्मकमत्र मन: सङ्कल्पकमिन्द्रियञ्च साधर्म्यात्।
गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च।।२७।।
शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्ति:।
वचनाऽऽदानविहरणोत्सर्गाऽऽनन्दाश्च पञ्चानाम्।।२८।।
स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या।
सामान्यकरणवृत्ति: प्राणाद्या वायव: पञ्च।।२९।।
युगपच्चतुष्टयस्य तु वृत्ति: क्रमशश्च तस्य निर्दिष्टा।
दृष्टे तथाऽप्यदृष्टे त्रयस्य तत्पूर्विका वृत्ति:।।३०।।
स्वां-स्वां प्रतिपद्यन्ते परस्पराऽऽकूतहेतुकां वृत्तिम्।
पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम्।।३१।।
करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्।
कार्यं च तस्य दशधाऽऽहार्यं धार्यं प्रकाश्यञ्च।।३२।।
अन्त:करणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्।
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम्।।३३।।
बुद्धीन्द्रियाणि तेषां पञ्च विशेषाऽविशेषविषयाणि।
वाग्भवति शब्दविषया शेषाणि तु पञ्चविषयाणि।।३४।।
साऽन्त:करणा बुद्धि: सर्वं विषयमवगाहते यस्मात्।
तस्मात्त्रिविधं करणं द्वारि द्वाराणि शेषाणि।।३५।।
एते प्रदीपकल्पा: परस्परविलक्षणा गुणविशेषा:।
कृत्स्नं पुरुषस्याऽर्थं प्रकाश्य बुद्धौ प्रयच्छन्ति।।३६।।
सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धि:।
सैव च विशिनष्टि पुन: प्रधानपुरुषाऽन्तरं सूक्ष्मम्।।३७।।
तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्य:।
एते स्मृता विशेषा: शान्ता घोराश्च मूढाश्च।।३८।।
सूक्ष्मा मातापितृजा: सह प्रभूतैस्त्रिधा विशेषा: स्यु:।
सूक्ष्मास्तेषां नियता मातापितृजा निवर्त्तन्ते।।३९।।
पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम्।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्।।४०।।
चित्रं यथाऽऽश्रयमृते स्थाण्वादिभ्यो विना यथा च्छाया।

तद्वद्विना(ऽ)विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्।।४१।।
पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन।
प्रकृतेर्विभुत्वयोगान्नटवद् व्यवतिष्ठते लिङ्गम्।।४२।।

सांसिद्धिकाश्च भावा: प्राकृतिका वैकृतिकाश्च धर्माद्या:।
दृष्टा: करणाऽऽश्रयिण: कार्याऽऽश्रयिणश्च कललाद्या:।।४३।।
धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण।
ज्ञानेन चाऽपवर्गो विपर्ययादिष्यते बन्ध:।।४४।।
वैराग्यात्प्रकृतिलय: संसारो भवति राजसाद्रागात्।
ऐश्वर्यादविघातो विपर्ययात्तद्विपर्यास:।।४५।।
एष प्रत्ययसर्गो विपर्ययाऽशक्तितुष्टिसिद्ध्याख्य:।
गुणवैषम्यविमर्दात् तस्य च भेदास्तु पञ्चाशत्।।४६।।
पञ्च विपर्यभेदा भवन्त्यशक्तिस्तु करणवैकल्यात्।
अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धि:।।४७।।
भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोह:।
तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्र:।।४८।।
एकादशेन्द्रियवधा: सह बुद्धिवधैरशक्तिरुद्दिष्टा।
सप्तदशवधा बुद्धेर्विपर्ययात्तुष्टिसिद्धीनाम्।।४९।।
आध्यात्मिक्यश्चतस्र: प्रकृत्युपादानकालभाग्याख्या:।
बाह्या विषयोपरमात्पञ्च नव तुष्टयोऽभिमता:।।५०।।
ऊह: शब्दोऽध्ययनं दु:खविघातास्त्रय: सुहृत्प्राप्ति:।
दानं च सिद्धयोऽष्टौ सिद्धे: पूर्वोऽङ्कुशस्त्रिविध:।।५१।।
न विना भावैर्लिङ्गं, न विना लिङ्गैर्न भावनिर्वृत्ति:।
लिङ्गाख्यो भावाख्यस्तस्माद् द्विविध: प्रवर्तते सर्ग:।।५२।।
अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति।
मानुष्यश्चैकविध: समासतो भौतिक: सर्ग:।।५३।।
ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलत: सर्ग:।
मध्ये रजोविशालो ब्रह्मादि: स्तम्बपर्यन्त:।।५४।।
तत्र जरामरणकृतं दु:खं प्राप्नोति चेतन: पुरुष:।
लिङ्गस्याऽविनिवृत्तेस्तस्माद् दु:खं स्वभावेन।।५५।।
इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्यन्त:।
प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भ:।।५६।।
वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्ति: प्रधानस्य।।५७।।
औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्त्तते लोक:।
पुरुषस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तम्।।५८।।
रङ्गस्य दर्शयित्वा निवर्त्तते नर्तकी यथा नृत्यात्।
पुरुषस्य तथाऽऽत्मानं प्रकाश्य निवर्त्तते प्रकृति:।।५९।।
नानाविधैरुपायैरुपकारिण्यनुपकारिण: पुंस:।
'गुणवत्यगुणस्य सततस्तस्याऽर्थमपार्थकं चरति।।६०।।
'प्रकृते: सुकुमारतरं न किञ्चिदस्ती'ति मे मतिर्भवति।
'या 'दृष्टाऽस्मी'ति पुनर्न दर्शनमुपैति पुरुषस्य।।६१।।
तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित्।
संसरति बध्यते मुच्यते च नानाऽऽश्रया प्रकृति:।।६२।।
रूपै: सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृति:।
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण।।६३।।
एवं तत्त्वाऽभ्यासान्नाऽस्मि न मे नाऽहमित्यपरिशेषम्।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्।।६४।।
तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम्।
प्रकृतिं पश्यति पुरुष: प्रेक्षकवदवस्थित: स्वस्थ:।।६५।।
दृष्टा मयेत्युपेक्षक एको दृष्टाऽहमित्युपरमत्यन्या।
सति संयोगेऽपि तयो: प्रयोजनं नास्ति सर्गस्य।।६६।।
सम्यग्ज्ञानाधिगमाद् धर्मादीनामकारणप्राप्तौ।
तिष्ठति संस्कारवशाच्चक्रभ्रमिवद् धृतशरीर:।।६७।।
प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति।।६८।।
पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम्।
स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम्।।६९।।
एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ।
आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम्।।७०।।
शिष्यपरम्परयाऽऽगतमीश्वरकृष्णेन चैतदार्याभि:।
संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम्।।७१।।
सप्तत्यां किल येऽर्थास्तेऽर्था: कृत्स्नस्य षष्टितन्त्रस्य।
आख्यायिकाविरहिता: परवादविवर्जिताश्चापि।।७२।।

●

ankurnagpal108@gmail.com